ॐ

NOTE BY BABU BHAGAVAN DAS.

प्राच्यविद्याविभागशास्त्रिमंडलाधिवेशनस्य २८ अक्तूबर स० १८१७ तिथिक (रिज़ोल्यूशन) निर्धारणस्य अनुवृत्त्या लिखितः संस्कृतविभागप्रबंधसंस्करणायोपन्यासः ।

(१) उपोद्घातः

१ प्रयोजन-निर्धारणा-वश्यकता

"प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्त्तते" ।
विद्वद्भिर्न पुनः कस्मात् कार्यं कार्यमशेषतः ।
विशेषतश्च तत्रापि स्वसंतानस्य शिक्षणम् ।
विचारितोपायापायं सुविनिश्चितहेतुकम् ॥
"व्यवसायात्मिका बुद्धिरेका" कृष्णेन वर्णिता ।
संभवेन्न च सा ह्येषा विना लक्ष्यविनिर्णयम् ॥
लक्ष्यहीना प्रवृत्तिर्या फलहीनापि सा भवेत् ।
शक्तिव्ययकरी व्यर्थं नैकाग्राऽनर्थशालिनी ।
तस्मादध्यापनं कार्यं सुनिर्णीतप्रयोजनम् ॥

२ प्रयोजन-स्वरूपम्, चतुर्वर्गः

तत्र प्रयोजनतमं सिद्धं साध्यद्वयं नृणाम् ।
यदाभ्युदयिकं प्रोक्तं यच्च निःश्रेयसं परम् ॥
"सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च ।

प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तं'' मनुनोदितम् ॥ (अ० १२)
यतश्चोभयसंसिद्धिः स धर्म इति शस्यते ।
समस्तमनुवंशस्यैकांतं कल्याणकारकः ॥
सूत्रितं च कणादेन ह्येतद्वैशेषिकर्षिणा ।
तत्राद्यं तु त्रिधा भक्तं कामेनार्थेन धर्मतः ॥
पुरुषार्थचतुर्वर्गो निर्विवादमिति स्थितः ।
धर्मार्थकाममोक्षाख्यो वारंवारं श्रुतः स्मृतः ॥

३ तस्य साधनं, चतुःशास्त्रम्

अथास्य साधनतमं शास्त्राध्ययनमेव हि ।
किं स्यादध्ययनं तत्र, शास्त्रं च, इति विवेचने ।
अधिकं यद्यदिष्टं स्याद् यद्बलेन तदीयते ।
विद्यते प्राप्यते चैव तद्ध्येवाध्ययनं स्मृतम् ॥
धर्मश्चार्थश्च कामश्च त्रिवर्ग इति निश्चितः ।
यद्बलेनोपलभ्येत तद्ध्येवाध्ययनं स्मृतम् ॥
परमः पुरुषस्यार्थः परमात्मेत्युदाहृतः ।
यद्बलेनावगम्येत तद्ध्येवाध्ययनं स्मृतम् ॥
शास्ति यत्साधनोपायं चतुर्वर्गस्य चोत्तमम् ।
शास्त्रं च साध्यानूक्त्यैव चतुर्धोक्तं महर्षिभिः ।
धर्मशास्त्रार्थशास्त्रे च कामशास्त्रं ततः परम् ।
प्रसिद्धं मोक्षशास्त्रं च—चतुर्धा शास्त्रसंस्थितिः ॥
द्वे विद्ये वेदितव्ये वै मुंडकेष्विति गीयते ।
परा ययाऽक्षरं ब्रह्म तच्छुक्रमधिगम्यते ॥
तथाऽपरा यया सर्वमन्यद्दासाद्यते नृभिः ।
मोक्षशास्त्रात्मिकाऽऽद्या हि, द्वितीया त्रितयात्मिका ॥

आबालमेतत्प्रथितं, पंचतंत्रेऽपि पठ्यते ।
विद्वानुवाच राजानं यथा तत्र कथामुखे ॥

"देव, द्वादशभिर्वर्षैर्व्याकरणं श्रूयते, ततो धर्मशास्त्राणि मन्वादीनि, अर्थशास्त्राणि चाणक्यादीनि, कामशास्त्राणि वात्स्यायनादीनि, एवं च ततो धर्मार्थकामशास्त्राणि ज्ञायन्ते"॥

योगभाष्ये तथा चोक्तं नियमानां प्रभाषणे ।
"स्वाध्यायः मोक्षशास्त्राणामध्ययनं, प्रणवजपो वा" ॥
अखिलान्यपि शास्त्राणि चतुर्ष्वतर्गतानि वै ।
प्राच्यर्वाची न सा विद्या या ह्येतेभ्यो बहिः स्थिता ।

४ तदुद्धारेणैव देशोद्धारः

लक्ष्योकृत्य चतुर्वर्गमेवमभ्यस्यते यदि ।
चतुःशास्त्रं तदैव स्याद् देशोन्नतिमहोदयः ॥
चतुर्वर्गचतुःशास्त्रमुख्यांगपरिवर्जनात् ।
सेवनात् कृत्रिमांगानां देशाधोगतिरीदृशी ॥

५ धर्मशास्त्रम्

धर्मशास्त्रं समुच्छिन्नंबह्वंगं दृश्यतेऽधुना ।
नाभ्यस्यते राजधर्मो दंडनीतिव्यपाश्रयः ॥
यत्रैव सर्वमर्यादाज्ञानमस्ति समाहितम् ।
यथा द्वैपायनेनोपश्लोकितं शान्तिपर्वणि ॥

"यथा राजन् हस्तिपदे पदानि संलीयंते सर्वसत्त्वोद्भवानि । एवं धर्मान् राजधर्मेषु सर्वान् सर्वावस्थान् संप्रलीनान् निबोध"॥

(अ० ६३)

इष्टापूर्त्तात्मको धर्मो यो देशेऽद्यापि शिष्यते ।
देशकालनिमित्तानामविचारेण दूषितः ।
सोऽप्यनर्थकरो जात इह चामुत्र चैव हि ॥
ऐहिकव्यवहारोपयोगी धर्मो विलोपितः ।
आमुष्मिकोऽपि संदेहं प्रापितो बुद्धिलोपनात् ॥

द्वाभ्यामेव हि पक्षाभ्यां यथा वै पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ॥
(हारीत० अ० ७)

नन्वेकेनैव चक्रेण सिध्येद्रथगतिः कथम् ।
विपन्ने चक्र एकस्मिन्नपरश्चैत्यपार्थताम् ॥
धर्मशास्त्ररथे भग्न एवं देवी सरस्वती ।
ब्राह्मी नो भारतात् खिन्ना सशोकं पश्चिमान् गता ॥

६ अर्थशास्त्रम्

अर्थशास्त्रं तथा भ्रष्टं समग्रं भारतान् ननु ।
मार्गणादपि दुष्प्राप्या ग्रन्थास्तत्प्रतिपादकाः ॥
आन्वीक्षिकीं त्रयीं वार्त्तां दण्डनीतिं च शाश्वतीः ।
विद्याः संवर्णयन् शुक्रो वार्त्तामेवमवर्णयत् ॥
"कुसीदकृषिवाणिज्यं गोरक्षा वार्त्तयोच्यते ।
सम्पन्नो वार्त्तया साधुर्न वृत्ते भयमृच्छति ॥
आन्वीक्षिक्यां तर्कशास्त्रं वेदांताद्यं प्रतिष्ठितम् ।
अर्थानर्थौ तु वार्त्तायां, दंडनीत्यां नयानयौ ।
वर्णाः सर्वाश्रमाश्चैव विद्यास्वासु प्रतिष्ठिताः" ॥(अ० १)
एतद्विद्याविलोपेन देशो दारिद्र्यमागतः ।
धर्मकामौ च हीयेते नितरां वृत्तिकर्षणात् ॥
"बुभुक्षितः किं न करोति पापं
क्षीणा जना निष्करुणा भवंति" ।
विश्वामित्रो ऋषिवर्योऽभिपेदे
दुर्भिक्षेणोपतप्तः श्वजाघनीम् ॥
न च त्रिवर्गहीनस्य चतुर्थः परिषिध्यति ।
आदिशत्स्वयमेवैतद्वत्सलो भगवान्मनुः ।
त्रितयं तदसम्पाद्य "मोक्षमिच्छन् व्रजत्यधः" ॥

न च वाच्यं यद्देषा तु क्रियाविद्या, न पाठ्यते ।
पंडितैः, किन्तु संसारे व्यवहारेण शिच्यते ॥

भावनाय तु भूतानां देवी भगवती त्रयी ।
वार्त्तारूपं धारयति, स्वयं देवैः स्तुतं यथा ॥

"शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवि त्रयी भगवती भवभावनाय
वार्त्ताऽसि सर्वजगतां परमार्त्तिहंत्री" ॥

वार्त्ताशास्त्रतिरस्कारोऽतस्त्रय्याः करणं तिरः ।
उपेचितार एतस्य, यथोक्तं शान्तिपर्वणि ।
"उपादातार एवैते नैते भूतस्य भावकाः" ॥

मनोराज्ञापि चात्रास्ति स्पष्टा स्वायंभुवस्य वै ।
"सर्वेषां ब्राह्मणो विद्याद् वृत्त्युपायान् यथाविधि ।
प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत्" ॥ (अ० १०)

सर्वज्ञस्य मनोरस्यादेशस्यैवावधीरणात् ।
अर्थशास्त्रमयी लक्ष्मी रोषिता पश्चिमान् गता ॥

७ कामशास्त्रम् कामशास्त्रस्य चैवापि माहात्म्यं विस्मृतं जनैः ।
"धर्माविरुद्धः कामोऽस्मि" भगवान् स्वयमब्रवीत् ॥

अश्लीलांशस्तु यस्तस्य स हि प्रायोऽवशिष्यते ।
साहित्यमखिलं तेन दुश्चरित्रेण दूषितम् ॥

यस्तु तस्योत्तमांशोऽस्ति गार्हस्थ्यसुखसाधनः ।
दम्पत्यपत्यसंबंधिस्नेहप्रीतिविवर्धनः ॥

संतानोत्कर्षसाधुश्च दुश्चरित्राद् विभीषणः ।
पशुभ्यो भेदको नृणामुत्तमाभिस्समृद्धिभिः ॥

काममातुर्लोकमातुर्मायाः साफल्यकारणः ।
देहिनां सर्वसंसाररसशोभैकराधनः ॥
कृत्स्नसंपत्परिष्कारिचतुष्षष्टिकलामयः ।
गौर्यन्नपूर्णादुर्गेति गृहाधिष्ठातृदैवतः ।
दौःशील्यदौर्भाग्यभयादस्माकं पश्चिमान् गतः ॥

८ मोक्षशास्त्रम् मोक्षशास्त्रेऽपि मुख्यांगं योगो नैवोपलभ्यते ।
वाचारंभणमात्रं हि श्रूयतेऽनल्पजल्पितम् ॥
यत्र विद्या, तपो नास्ति; न विद्या, यत्र तत् तपः ।
अश्रद्धेया ह्यतो जाताः प्रायशो वेशिलिंगिनः ॥
एवं शास्त्रे चतुर्व्यूहे संस्थिते ह्यव्यवस्थिते ।
चतुर्वर्गस्य नैवास्ति सिद्धिर्, आर्यैर्विचार्यताम् ॥
पुरुषार्थचतुष्कस्य सदा चेतसि धारणात् ।
चतूराशीकृतस्यैव शास्त्रस्याभ्यसनात्तथा ॥
लक्ष्येऽक्षमायोज्य पदन्यासादस्खलितं पथि ।
पाश्चात्यविद्याऽऽचार्यैश्च विद्याविनिमयैः सह ॥
पुनः प्रसादयिष्यामो गिरां गौरीं तथेंदिराम् ।
ज्ञानशक्तिमिच्छाशक्तिं क्रियाशक्तिं तथा क्रमात् ।
नान्यथाऽऽवाहयिष्यामः पुनस्ता भारते सुखम् ॥

९ पाश्चात्योपज्ञोपयोगिता न चात्र शंकनीयं वै स्वप्नेष्वपि कदाचन ।
पाश्चात्योपज्ञशास्त्राणां का पौर्वेपूपयोगिता ॥
अस्मिन्नर्थेऽपि जागर्ति मनोराज्ञा गरीयसी ।
"स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम् ।
विविधानि च शिल्पानि समादेयानि सर्वतः" ॥ (अ० २)
अग्निवेशकृतं तन्त्रं चरकस्तु समस्करोत् ।
नीलकंठोऽर्वदेशाच्च नवज्योतिषमावहत् ॥

इंद्रो विभ्रष्टमात्मीयं शीलं प्रह्लादमाश्रितम् ।
संसेवनात्तु तस्यैव सुचिरादाप्तवान्पुनः ॥
अज्ञो बृहस्पतिस्तस्याः शुक्रशुश्रूषया भृशम् ।
मृतसंजीवनीं विद्यां पुत्रद्वारा समानयत् ॥
श्वेतकेराज्यधाराभिरजीर्णं लंभितः शुचिः ।
कृष्णयोर्वलमासाद्य खांडवौषधमापिबत् ॥
अनुवाकहता चैषा भारतस्य तथा किल ।
औपज्ञान्मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥
संदिहंत्यत्र केचित्तु—पाठशैली हि या सृता ।
सांप्रतं, तत्र किन्नास्ति यत्कृतेऽन्यक्रमे श्रमः ॥

१० वर्तमाना दुर्व्यवस्था

अस्योत्तरं पूर्वमुक्तं, मुख्यांशा बहवश्च्युताः ।
सुक्रमाभावतश्चान्यच्छिष्टं च व्यर्थतां गतम् ॥
वेदाः प्रायो विगलिता निरुक्तं नैव पठ्यते ।
इतिहासपुराणानामर्थोऽतोऽनर्थतां गतः ॥
"छंदः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्, निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य, मुखं व्याकरणं स्मृतम् ।
तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते ॥"
"सरहस्योऽधिगंतव्यो वेदः सपरिबृंहणः ।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥"
"तस्य कर्म विवेकार्थं शेषाणामनुपूर्वशः ।
स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ॥
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ।
इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम् ।

इदं यशस्यमायुष्यमिदं निःश्रेयसं परम् ।। (अ० १)
यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्त्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।।" (मनु०:अ०२)

इत्यादिऋषिसूक्तानां साफल्यं नैव दृश्यते ।
धर्मे कामे च मुख्योंऽशः सर्वो विपरिलोपितः ।
अर्थशास्त्रं कलाशास्त्रमंतर्धानमवापतुः ।।
"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् ।"
"सर्वेषामेव शास्त्राणां न्यायव्याकरणं मुखम् ।"
इत्येतच्छ्रूयते किंतु व्यवहारे न लभ्यते ।।
द्वाःपालौ व्याकृतिन्यायौ सार्वभौमपदं गतौ ।
उपकार्यं गतं प्रायः प्रभवत्युपकारकम् ।।
सर्वांगमन्यत्संछिद्य मुखमेवावशिष्यते ।
प्रमाणे यादृशी निष्ठा न प्रमेयेषु तादृशी ।
पाचने सुमहान् यत्नो न तथा भोजने श्रमः ।।
प्रायशोऽश्लीलपूर्णेषु व्याकुलज्ञानवत्सु च ।
चातुर्यमात्रसंपन्नकाव्येष्वेवादरो महान् ।।
सर्वज्ञानमये सर्वरसे शीलविशोधने ।
पुण्यश्लोकेऽप्यादिकाव्येऽप्यार्षेऽपि न तथा रुचिः ।।
न सेव्यतेऽन्नं गोधूमयवद्विदलमोदनम् ।
न क्षीरं पीयते, कोष्ठः पूर्यतेऽलमुपस्करैः ।
नैवं समाजदेहस्य स्वास्थ्यं संशोधनं विना ।।
यादृग् वै काव्यसाहित्यं देशावस्था च तादृशी ।
एतयोराश्रयोऽन्योन्यं पातोत्पातौ सहैव च ।।
क्षुद्रग्रंथाः क्षुद्ररसाः यद्देशे प्रसरन्ति हि ।
देशः पिपतिषुः स स्याद् दानितः कामदामभिः ।।

चमत्कारयितुं प्रायश्चमत्कर्त्तुं स्वयं तथा ।
अर्वाचीना ह्यकवयन् यशसेऽर्थकृतेऽथवा ॥
पुराणकवयस्त्वन्ये प्राचीनाः परमर्षयः ।
योगक्षेमाय भूतानां पितृवल्लोकवत्सलाः ॥
सर्वशिक्षामयान् सर्वरसपूर्णान् जगद्धितान् ।
साधनान् साधुसाध्यानां ग्रन्थान् जग्रन्थुरन्यथा ॥

"पठन् द्विजो वागृषभत्वमीयात् स्यात्क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीयात् जनश्च शूद्रोऽपि महत्त्वमीयात् ॥"

"यः स्वानुभावमखिलश्रुतिसारमेक-
मध्यात्मदीपमतितितीर्षतां तमोऽधम् ।
संसारिणां करुणयाऽऽह पुराणगुह्यं
तं व्यासमूनुमुपयामि गुरुं मुनीनाम् ॥"

रजोमात्रानुविद्धं धीसत्त्वं, योगेषु पठ्यते, ।
धर्मज्ञानविरागाणामैश्वर्य्यस्योपगं तथा ॥(यो० भा० १-२)

वीरः सत्त्वं रजो हास्यं, तमः शृंगं, समः शमः ।
किंचिन्मात्रं तु हास्यस्य, अतोऽधिकं वीरशांतयोः ।
साहित्येवर्धनं कार्यं चेद् देशोन्नतिरीप्सिता ॥

११ क्रम-संशोधना-वश्यकता

यच्छंक्यते—ऽथ को लाभः क्रमस्य परिवर्त्तनात् ।
प्रकारे प्रसृते ह्येवाभीष्टमन्यत्प्रवर्ध्यताम् ।
तत्रैतत्तु समाधानं—सुक्रमे सिद्धिनिर्भरः ॥

वसूनि वसुधागर्भे वसंतु सुतरामपि ।
अनुद्धृतैर्मनुष्याणां फलं किं तैरसंस्कृतैः ॥

"नामंत्रमक्षरं किंचिन्न च द्रव्यमनौषधम् ।
नायोग्यः पुरुषः कश्चित् प्रयोक्तैव तु दुर्लभः ॥"

प्रयोजनमनुद्दिश्य प्रयोक्ता चेत्प्रवर्त्तते ।
श्रमो विफलतां याति प्रयोगो न प्रसिध्यति ।
क्रमेणैकेन नश्येचान्येन सिध्येत्प्रयोजनम् ॥
यथा दीपमुपादाय रात्र्यां स्यान्मार्गणे फलम् ।
न तथा तं विना, तद्वद् योग्यता क्रमसाध्ययोः ॥
कार्यारंभे प्रसारेऽतः सुविचार्यौ क्रमाक्रमौ ।
यथाऽवयवसंस्थानविशेषः खलु कारणम् ॥
सौंदर्ये वाप्यसौंदर्ये कायव्यूहे समेऽपि च ।
तथैव शास्त्रव्यूहेऽपि चतुरंगं सुपोषितम् ॥
समं समवलं चेत्स्यात् तदा स्यात्स्वस्थचारुता ।
व्यूढ़ा सेना, तथाऽव्यूढं संकुलं व्याकुलं भवेत् ॥
सुव्यवस्थापनाद् गेहं, अन्यथेष्टकसंचयः ॥

१२ उदाहरणानि सदाचरितानि

धर्माणां च क्रमाणां च कृतं हि परिवर्त्तनम् ।
देशकालनिमित्तानुसारं पूर्वैः पुनः पुनः ॥
"अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे नृणाम्" इत्यवोचन्मनुः स्वयम् ॥
व्यासो व्यास पुराणर्षिर्ब्रह्मवाक्यमपि ध्रुवम् ।
"वेदमेकं स बहुधा कुरुते हितकाम्यया ॥"
"व्यदधाद् यज्ञसंतत्यै वेदमेकं चतुर्विधम् ।"
"भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ॥"
"एवं चकार भगवान् व्यासः कृपणवत्सलः ।
प्रवृत्तः सर्वभूतानां हिताय मुनिनायकः ॥"
इत्यादि प्राक्तनाख्यानं पुराणेभ्योऽधिगम्यते ।
द्वैपायनप्रशिष्योऽपि याज्ञवल्क्याभिधो मुनिः ॥

to dissidents parts.

अयातयामं कल्यादौ नवं वेदमवर्त्तयत् ।
यं तु शुल्कयजुर्नाम्ना ह्याहुर्वाजसनेयिनः ।
प्राचीनेभ्यो यजुर्भ्यश्चाभ्यधिकं प्रचचार यः ॥
द्वीपांतरादुपावृत्त्य गालवोपि तथा मुनिः ।
नवीनैर्बहुभिर्धर्मैर्युक्तां स्मृतिमकल्पयत् ॥
अपरे मुनयश्चापि तथा विंशतिशः स्मृतीः ।
देशकालनिमित्तानुसारं व्यरचयन् बुधाः ॥
अर्वाचीनेष्वपि तथा प्रत्यक्षं दृश्यतेऽधुना ।
सूत्राणां पाणिनीयानां क्रमो विपरिवर्त्तितः ॥
सिद्धांतकौमुदीकर्त्रा बहुभिश्चानुमोदितः ॥
विसंवादोपि तत्रास्ति पाणिनिक्रमनंदिनाम् ।
बुद्धिपूर्वमतः कार्यो नूतनक्रमविक्रमः ॥
बुद्धिपूर्वं कृते यादृक् फलं नाबुद्धिपूर्वकम् ।
कृते तादृग् भवेद्, अस्मादेव स्वायंभुवोऽब्रवीत् ॥
"न ह्यनध्यात्मवित् कश्चित् क्रियाफलमुपाश्नुते ।"
सुविचार्य ततः कार्या चतुःशास्त्रोद्धृतिः पुनः ॥
एवं शास्त्रचतुर्व्यूहनवावतरणेन वै ।
दैत्यावज्ञानदारिद्र्ये नेष्येते यमसंक्षयम् ॥
चातुर्वर्ण्यं हेतुयुतं गुणकर्मविभागशः ।
चातुराश्रम्यसंयुक्तं पुनश्च स्थापयिष्यते ।
धर्मः श्रद्धास्यते चापि युक्तिपुष्टो, यथोदितम् ।
"यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥" (मनुः)

१३ सनातन-वैदिकधर्म-मर्मभूतस्य चतुर्वर्गस्य उपसाधनभूतं चतुःशास्त्र-व्यवस्थापितं उदारार्य-बुद्ध्यात्मक-सर्वलोक-संग्राहकं चातुर्वर्ण्यं चातुराश्रम्यं च

यथाह भगवान् कृष्णो मनुर्व्यासः पुनः पुनः ।
"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥"
"कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ।" (गीता)
"सद्‌गुणो ब्राह्मणो वर्णः, क्षत्रियस्तु रजोगुणः ॥
तमोगुणस्तथा वैश्यः, गुणसाम्यात् तु शूद्रता ।"
(भविष्य०—पर्व ३३, खं० ४, अ० २३)
"ब्राह्मणानां सितो वर्णः, क्षत्रियाणां तु लोहितः ॥
वैश्यानां पीतकश्चैव, शूद्राणामसितस्तथा ।"
(शांति० अ० १८६)
"ब्रह्म वक्त्रं, भुजौ क्षत्रं, कृत्स्नमूरूदरं विशः ।
पादौ यस्याश्रिताः शूद्रास्तस्मै वर्णात्मने नमः ।"
(स्तवराजः)
"सर्वेषां ब्राह्मणो विद्याद् वृत्त्युपायान्यथाविधि ॥
प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् ।" (मनुः)
"क्षत्रियस्तु सतो रक्षेदसतश्च निवर्तयेद् ॥
वैश्यस्तु धनधान्येन त्रीन् वर्णान् बिभृयादिमान् ॥
शूद्रो ह्येतान् परिचरेदिति ब्रह्मानुशासनम् ॥"
(शांति० अ० ७२)
संगृह्येतायमेवार्थोऽपरशब्दैः, परस्परम् ।
भवेदाध्यात्मिकस्तेषां संबंधोऽपि स्फुटो यथा ॥
ज्ञानदो ब्राह्मणः प्रोक्तस्त्राणदः क्षत्रियः स्मृतः ।
प्राणदो ह्यन्नदो वैश्यः, शूद्रः सर्वसहायदः ॥
मानार्हो ब्राह्मणः प्रोक्तः, क्षत्रियस्त्वधिकारवान् ।
वैश्यो विशां निधिः, शूद्रो वस्त्रैरन्नैस्सुतर्पितः ।
"अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते ॥"
(शांति० अ० २६)

धर्मवान् ब्राह्मणः प्रोक्तः, क्षत्रियस्त्वर्थनायकः ।
वैश्यः काम्यसमृद्धश्चाऽप्रौढः शूद्रस्तु बालकः ॥

"तमसो लक्षणं कामो, रजसस्त्वर्थ उच्यते ।
सत्त्वस्य लक्षणं धर्म" इत्येवं मनुरब्रवीत् ॥

सत्त्वं विष्णू रजो ब्रह्मा, तथा रुद्रशिवस्तमः ।
सत्त्वं वाणी, रजो लक्ष्मीरिच्छाशक्तिरुमा तमः ।
शक्तिदैवततंत्रेषु रहस्येष्विति गीयते ॥

ज्ञानयज्ञो ब्रह्मचारी, गृहमेध्यर्थयज्ञभाक् ।
कामवान् परलोकस्य वनस्थो बहुयज्ञकृत् ।
"दाता नित्यमनादाता सर्वभूतानुकम्पकः ।" (मनुः)
चतुर्थमाश्रमं प्राप्य संन्यासी मोक्षभाग्भवेत् ॥

ज्ञानवान् ब्राह्मणो जीवः, कर्मण्यः क्षत्रियो भवेत् ।
इच्छाद्रव्ययुतो वैश्यः, शूद्रोऽनुद्बुद्धबुद्धिमान् ॥
(शिवदेवीपुराणेषु येच्छाशक्तिरुदाहृता ।
विष्णुभागवते सैव द्रव्यशक्तिरितीरिता ॥)

"अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः ।
नैषामादिः संप्रयोगो वियोगो वोपलभ्यते" ॥
(देवीभागवतं, ३—८—१२)

ब्राह्मणो ह्यग्रजन्मानुजन्मानश्च त्रयोऽपरे ।
भ्रातरस्सर्व एवैते, प्राणसंबंधिनोऽथवा ।
ततोऽप्यतितरामेकशरीरावयवा इह ।
यथा वक्त्रं भुजावूरूदरं पादौ परस्परम् ॥
"नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते" । (मनुः)
नावैश्यमुभयं जीवेन्नोभयेन विना विशः ॥

चरेत् त्रिकं च नाशूद्रं पादहीनशरीरवत् ।
न विना त्रितयस्नेहैर्बालवच्छूद्रपालनम् ॥
"संमानाद् ब्राह्मणो नित्यमुद्विजेत विषादिव ।
अपमानस्य चाकांक्षेदमृतस्येव सर्वदा" ॥ (मनुः)
संमानयेयुरपरे ईदृशं तु प्रयत्नतः ।
एवमेवोभयोः शोभाऽन्यथा हानिर्ध्रुवोभयोः ॥
उद्विजेताधिकारात् सत्त्वत्रियोपि विवेकवान् ।
निदध्युरपरे चास्मिन् श्राज्ञाशक्तिं पुनर्बलात् ॥
ब्रह्मादेशात्प्रजाभिस्तु वृतो राज्यात् त्रसन्मनुः ।
कथंकथमपि क्लेशादनुनीतैः प्रतिश्रवैः ॥
तथैव कार्त्तवीर्योपि राज्यं नांगीचकार ह ।
दिव्यदृष्ट्यादियोग्यत्वैर्यावन्न मुनिना भृतः ॥
न स्वभोगाय वैश्योपि धनमिच्छेत्कदाचन ।
इष्टापूर्त्ताय चान्ये तु कुर्युरेनं विशां निधिम् ॥
न शूद्रः स्वांगपुष्ट्यर्थमिच्छेन्नु बहुभोजनम् ।
अपरे तु हठादेनं वर्धयेयुस्सुपोषणैः ॥
एवं सर्वेऽपि निःस्वार्थाः सदा परहितैषिणः ।
संतोऽपि हापयिष्यंते नैव सांसारिकैः सुखैः ॥
"यज्ञशिष्टाशिनस्संतो मुच्यंते सर्वकिल्बिषैः ।
भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् ॥
यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ।" (गीता)
सयज्ञस्य त्वयं लोकः परश्चापि सुखात्मकः ॥
"यज्ञाय सृष्टानि धनानि धात्रा
यज्ञाय सृष्टः पुरुषो रक्षिता च ॥

तस्मात्सर्वं यज्ञ एवोपयोज्यम्
धनं न कामाय हितं प्रशस्तम्" ॥

(शांति० अ० २४ अ०)

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः" । (गीता)
"आरंभयज्ञाः क्षत्राश्च, हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्राश्च, जपयज्ञा द्विजातयः ॥"

(शांति० अ० २३७)

विप्रस्याध्यापनं यज्ञो, रक्षणं क्षत्रियस्य च ।
द्रव्यान्नदानं वैश्यस्य शूद्रस्यान्यसहायता ॥
"अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम्" ॥
सर्वेषां च चतुर्वर्गः सर्वैरेव क्रमात् तथा ।
यथाशक्यं साधनीयः सेवान्नत्राणज्ञानतः ॥
परस्परं ते स्नेहार्हाः पोषणार्हास्तथा भृशम् ।
न कदाप्यवमंतव्या, एवं देशोन्नतिर्भवेत् ॥
हस्तपादोदरास्येषु कः स्नेहार्हो न वा च कः ।
परस्परावज्ञानेन देशाधोगतिरीदृशी ॥
अन्यच्चाप्यवधार्यं वै, गुणकर्मस्वभावतः ।
सर्वेऽपि मनुजा नूनं चतुर्वर्णांतरागताः ॥
मनुना स्वयमादिष्टं यथा "नास्ति तु पंचमः" ।
"ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो, नास्ति तु पंचमः" ॥
अस्मिन्नर्थे प्रमाणं चेदधिकं यद्यपेक्षितम् ।
—:—तिर्यक्षु वर्णा गण्यन्ते, देवेष्वपि–विचार्यताम् ॥

संसारे सर्वकालेषु सर्वदेशेषु चैव हि ।
त्रैगुण्यव्यापकत्वात्तु चातुर्वर्ण्यं प्रवर्त्तते ।
धर्मकर्मविभागाय स्वभावप्रभवैर्गणैः ।
"न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यत्स्यादेभिस्त्रिभिर्गुणैः ॥" (गीता)
यथाप्येवं मिथुनता त्रिगुणानां तथापि हि ।
"वैशेष्यात्त्वथ तद्वादः" ततः कर्मविभक्तता ॥
(ब्रह्मसूत्र० २—४—२२)

कौर्मे प्रोक्तास्तु, याः प्लक्षे शाल्मलौ च कुशे क्रमात् ।
क्रौंचे शाके तथा श्वेते वर्णाख्याः संभवंति हि ॥
"आर्यकाः कुरुराश्चैव विदेहा भाविनस्तथा ।
ब्रह्मक्षत्रियविट्शूद्राः प्लक्षद्वीपे प्रकीर्त्तिताः ॥
कपिला ब्राह्मणाः प्रोक्ताः राजानश्चारुणास्तथा ।
पीता वैश्याः स्मृताः कृष्णाः शाल्मलौ वृषलास्तथा ॥
ब्राह्मणा द्रविणाः प्रोक्ताः क्षत्रियाः शुष्मिणस्तथा ।
वैश्यास्तोभास्तु मंदेहाः कुशे शूद्राः प्रकीर्त्तिताः ॥
पुष्कलाः पुष्करा धन्यास्तिष्याः क्रौंचे क्रमेण वै ।
मृगाश्च मगधाः शाके मानसा मंदगास्तथा" ।
श्वेतेऽवर्णाः श्वेतवर्णा प्रायस्त्रिगुणवर्जिताः ॥
(कूर्म०, अ० ४६)

एवं द्वीपेषु सर्वेषु क्ष्मायां वर्णा व्यवस्थिताः ।
सर्वदेशेष्विदानीं च प्रायः सर्वनृजातिषु ।
चत्वारो मुख्यतो हीमे, किंतूक्ता भिन्ननामभिः, ॥
समाजकायव्यूहार्थं, न स्पर्धार्थं परस्परम् ॥

प्रकृत्यैव विभागेन कार्यनिर्वाहणाय वै ।
ज्ञानक्रियेच्छाद्रव्याणां सर्वसाहाय्यकस्य च ।
प्रायशस्त्वन्यदेशेषु कर्मणा तद्व्यवस्थितिः ॥
भारतेऽप्यधुना संति सर्वजातिषु पंडिताः ।
महाराजपदप्राश्च भूमिपाः सर्वजातिषु ।
धनसंग्राहकाश्चापि, चतसृष्वपि सेवकाः ॥
लोकसंग्रहबुद्ध्येदं दृष्ट्वा कार्यं प्रवर्त्यताम् ।
शास्त्रं यथा न लुप्येत लुप्तं जीवेद् यथा पुनः ॥
"विवाहे भोजने चास्तु कुलजातिविवेचनम्" ।
(येषां तु तदभीष्टं स्यात्, न तत्रास्ति बलात्क्रिया ।
यतोऽत्र देशे प्रथिता जन्मना वर्णता चिरात् ॥)
यथाह शुक्रस्तु, अन्यत्र देशकार्यमहोदये ।
कर्मशीलगुणाः प्रेक्ष्या, नान्यथा लोकसंग्रहः ॥
अध्यापनाय च पुनर्दृष्ट्वा बालस्य योग्यताम् ।
यद्वृत्तेरनुरूपा सा तस्या अर्थे स शिक्ष्यताम् ।
प्रसन्नोदारया बुद्ध्या लोकसंग्रहशीलया ॥
धर्मशास्त्रे विशेषेण, मुख्यतोऽर्थेषु वा पुनः ।
प्राधान्येन कलायां वा, मोक्षशास्त्रेऽथवा तथा ।
एवं च सर्वजातीनां सर्वदेशस्य चोन्नतिः ॥

१४ चतुःशास्त्रोन्नत्यैव देशोन्नतिः

उदारहृदयैरेवं विश्वविद्यालये श्रमः ।
चतुर्वर्णाश्रमाणां च सदा संग्रंथनोद्यतैः ।
चतुर्वर्गार्थिभिश्चापि चतुःशास्त्रानुसारिभिः ।
क्रियते चेत् तदा नूनं सिध्येद्देशोन्नतिर्ध्रुवा ॥

चत्वार आश्रमा वर्णा वर्गाः शास्त्राणि चैव हि ।
—कुटुंब्यो वा समाज्यो वा व्यापार्यो दांडनैतिकः ॥

ऐहिकः परलोक्यो वा धर्म्योऽर्थ्यः काम्य एव वा।
सुखाभ्युदयिको वापि नैःश्रेयसिक एव वा ।
—न प्रश्नः सोऽस्ति मानव्य एते नैवोत्तरंति यम् ॥

आर्या परार्थिनी लोकसंग्रहैकाग्रहा शुचिः।
बुद्धिश्चेद् योज्यते तस्मिन् शांता स्निग्धा बहुश्रुता ॥

इति उपोद्घातः ।

(२) पाठक्रमः

१ नामनिर्वचनं

अथ विचारणीयम्—नूतनः प्रबंधः कथं रचनीयः, विश्वासाम् विद्यानाम् आलय इत्यन्वर्थनामा कर्तुमिष्टश्चेद् विश्वविद्यालयस्तदा चतुर्णाम्पूर्वोक्तशास्त्राणां तदवांतरप्रकारविकारादिभूतानां मुख्यानां विद्यानां च निधानं बीजरूपेण वाऽङ्कुररूपेण वा वृक्षरूपेण वा यथाशक्यं करणीयं अध्यापकगवेषकवृत्तिधरादिद्वारा एतस्मिन् ।

२ प्रबंधस्य उत्तमः प्रकारः, विभाग-चतुष्टयं

एतदुद्देश्यसंपादनायोत्तमः प्रकारस्त्वयमेव यच्चतुःशास्त्रानुसारेण चत्वारो विभागाः कल्प्येरन् संस्कृतविभागे, यथा—

(१) धर्मशास्त्रविभागः (Faculty of Law, Human and Divine);

(२) अर्थशास्त्रविभागः (Faculty of Science, Pure and Applied);

(३) कलाशास्त्रविभागः (Faculty of Arts, Domestic and Fine), यद्यपि शिष्टाचारस्मृत्यादिपरम्पराप्रसिद्धं नाम कामशास्त्रमिति, तथाप्याधुनिको लोकस्तस्मिन्नाम्नि विप्रतिपद्येत, लोकविरुद्धं च यावच्छक्यं नाचरणीयं, न च सर्वोऽपि विषयस्तस्य शास्त्रस्य विद्यालयेष्वध्याप्यः (यद्यपि बह्वधीयमानषट्काव्येष्वपि बह्वश्लीलं वर्त्तत एव) किंतु ज्ञानसंपूर्त्त्यायिन्यशास्त्रशिक्षापरिपक्वबुद्धिना स्वयमेवावलोकनीयः, अतः "कलाशास्त्रविभाग" इत्येवोचितं नामात्र युज्यते, यतः सर्वा अपि कलाः गार्हस्थ्योपयोगिन्यः कामशास्त्रांतःपतिताः; उक्तं च मनुना,

"यथा नदीनदाः सर्वे सागरे यांति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यांति संस्थितिम् ॥
यथा वायुं समाश्रित्य वर्त्तते सर्वजंतवः ।
तथा गृहस्थमाश्रित्य वर्त्तते सर्व आश्रमाः ॥
यस्मात् त्रयोऽप्याश्रमिणः ज्ञानेनान्नेन चान्वहम् ।
गृहस्थेनैव धार्यते तस्माज्ज्येष्ठाश्रमो गृही ॥
सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्त्ति हि ॥"

अतः गार्हस्थ्यशास्त्ररूपकामशास्त्रांतःपतिताः उत्तमोदारोदात्तकलाः अस्मिन् विभागेऽध्याप्या विषया इति कलाशास्त्रविभाग इति नामोचितम् ;

(४) मोक्षशास्त्रविभागश्चेति (Faculty of Theology).

३ प्रवृत्तः प्रकारः, तस्य न्यूनता

न त्वयं प्रकारोऽवलंबितो वर्त्तमान–रेग्युलेशन-व्यवस्थाभिः, किंतु विभागद्वयमेव निरूपितं, यथा (१) प्राच्यविद्याविभागः (२) धर्मविज्ञानविभागश्च; न चैतौ कंठोक्त्या परस्परं व्यावर्त्तकौ, न चाद्यः विशदं किंचित् प्रयोजनभूतं पुरुषार्थं द्योतयति, न च प्राच्यत्वं विद्यायाः समवेतमनाकस्मिकं लक्षणं, नहि संस्कृतविद्या केवलपूर्वकालपूर्वदेशावच्छिन्नोपयोगसंबंधा वा; न च द्वितीयस्मिन् विज्ञानशब्दस्तथाऽर्थपूर्णो यथा शास्त्रशब्दः; अन्यथा चापि ते नियमाः अतित्वरायामपर्याप्तपरामर्शेन कल्पिताः प्रायशो विकला एव; तेषां संशोधनाय यत्नः करणीयः स च राजपुरुषानुज्ञयैव, सेत्स्यति, यथा विधान-विधिषु (एक्ट-स्टाट्यूटनामसु) विहितमस्ति; तदर्थं कालोऽपेक्षितः; किंत्वंतरालेऽपि तेन यत्नेन सहैव यदि संभवेत् चेत् वर्त्तमान-रेग्युलेशन-व्यवस्थानु-

कृत्स्नेनापि प्रबंधसंस्करणं कर्त्तव्यम् । एतद्विचारार्थमेका परिमितसभासत्का समितिर्नियोक्तव्या वर्त्तमानोभयविभागस्थविदुषां ।

तया च समित्या तथाऽन्यैरपि शिष्टसभा-(सिनेट)-शास्त्रिमंडल-(फेकल्टी)-आदिसभ्यैः विचारायाधोलिखितः प्रकारः प्रतिपाद्यते; सूचनामात्रं चैष उपन्यासः, "पूर्वरंगः प्रसंगाय नाटकीयस्य वस्तुनः", "पूर्वरंगं विधायैव सूत्रधारो निवर्त्तते", इति न्यायात् ।

४ तत्पूर्त्युपायः

'प्राच्यविद्याविभागे' सांप्रतमवांतरतया विभागत्रयमुद्बोधनीयम्—

(१) कलाशास्त्रविभागः, (२) अर्थशास्त्रविभागः, (३) मोक्षशास्त्रविभागश्च ।

(The first will correspond to the modern 'Faculty of Arts,' but will include some subjects which modern Faculties of Arts do not, and will exclude others which they do; the second to the 'Faculty of Science,' pure and applied, with similar inclusions and exclusions; the third is strictly the equivalent of the Faculty of Theology, the Science of God, *Paramátmá*, realisation of Whom is Moksha; but the distribution of subjects of study, changed by circumstances, makes it take the place of the Faculty of Law, as a secular subject, open to all, while the Dharma-shástra-vibhága, strictly corresponding to the Faculty of Law, takes the place of the Faculty of Theology, or Religion, because it includes not

only 'human' but also 'divine Law, and therefore some subjects to which all students are not admissible by the special conditions of the B. H. U.)

(४) 'धर्मविज्ञानविभागस्तु' धर्मशास्त्रविभागत्वेनांगीकार्यः ।

२ धर्मविज्ञान-विभागेऽध्याप्या विषयाः

(क) धर्मशास्त्रविभागे के विषया अध्याप्या इति प्रश्ने, प्राचीना प्रथैव पुनरप्यस्मानुपकरोति ।

"पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
इतिहासपुराणं च पंचमो वेद उच्यते ।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" ॥

इति याज्ञवल्क्यादिभिः स्मर्यते । तथा शुक्रेणाप्युच्यते,

"अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रपुराणानि त्रयीदं सर्वमुच्यते" ॥

एतावता पर्यवस्यते यदस्मिन् विभागेऽध्याप्या विषया एते भवंति—

(१) (२) (३) (४) चत्वारो वेदाः मंत्रब्राह्मणोपनिषद्युताः (The Four Vedas)

तेषां षडंगानि,

(५) शिक्षा (including the Psychology and Physiology of speech),

(६) कल्पः (including Pedagogy and Methodology),

(७) व्याकरणम् (Grammar),

(८) निरुक्तम् (Philology, the science of language, of the origins and changes of words and meanings, of different interpretations, allegorical, historical, metaphysical, ritualistic, etc.)

(अत्र विशेषो यत्नः कार्यः),

(९) छंदः (Prosody, the Science of Metre and Rhythm),

(१०) ज्योतिषम् (including Astronomy and all branches of Mathematics).

(अत्र विशेषो यत्नः कार्यः)

(११) स्मृतयः (क) व्यवहारधर्मः (including the Personal Law of the Hindus),

(ख) आचारप्रायश्चित्तादिधर्मः, तत्संबंधीनि धर्मगृह्यश्रौतादिसूत्राणि (including Rules of Conduct, Manners and Morals, elementary Hygiene and Sanitation, Sacraments, etc.),

(ग) राजधर्मः, राजनीतिः, दंडनीतिः(including the Science of Government' Politics and Civics) (अत्र विशेषो यत्नः कार्यः),

(१२) मीमांसा, कर्मकांडांशो विशेषतः (Rules of Ritual and of Interpretation of the Vedic texts concerned therewith),

(१३) न्यायः, सामान्यतः (the elements of Logic),

(१४) इतिहासपुराणं, (क) भूगोलभूसंस्थानादिवर्णनयुतं, अर्वाचीनेतिहाससमेतं च (including

History and Geography in the widest sense and in all their branches, including the main principles of Evolution and Dissolution, Anthropology, Sociology, etc.) (अत्र विशेषो यत्नः कार्यः),

(ख) विविधाश्चागमाः शैववैष्णवशाक्तादयः (including the histories and beliefs and worships of various Sects) (अत्र तु यत्नः सांप्रतं न कार्यः),

(१५) धनुर्वेदः राजधर्मांगभूतः (including the Science and Art of various Physical Accomplishments, and the theory of offence and defence),

(१६) आयुर्वेदः आचारधर्मांगभूतः (including the Science of Life in all its branches and all its subsidiaries, Biology with all its subdivisions of Botany, Zoology, Embryology, Physiology, Anatomy, etc.; Hygiene and Sanitation; Medicine in all branches; the elements of Chemistry and Physics) (अत्र-विशेषो यत्नः कार्यः);

६ तथा अर्थशास्त्रविभागे

(ख) अर्थशास्त्रविभागे त्वेते विषया अध्याप्या, यथोक्तं शुक्रेण, "कुसीदकृषिवाणिज्यं गोरक्षा वार्त्तयोच्यते" (विविधानि च शिल्पानि तथा कारुककर्म च); अर्थात्—

(१) कुसीदशास्त्रम् (including Economics or Political Economy, the Science of Wealth, the Theory of Banking and of Money and the Mechanism of Exchange, etc.),

(२) कृषिशास्त्रम् (including the Science of Agriculture, Horticulture, Sericulture, etc.),

(३) वाणिज्यशास्त्रम् (including the Science of Commerce, and of Industries of all kinds),

(४) गोरक्ष्यशास्त्रम्, (including the Science of the rearing and keeping of Domestic Animals, cattle, horses, sheep, etc., Dairy-farming, etc.),

(५) शिल्पवेदः (स्थपतिशास्त्रम्, वास्तुशास्त्रम्, विविधयंत्रविद्या, वैज्ञानिकतंत्राणि, वापीकूपतटाककुल्याराजमार्गादिनिर्माणविद्या, राजधानीपुरनगरग्रामादिकल्पनसंनिवेशनविद्या), (Technical Arts and Industries, Applied Physics, all Sciences generally, Engineering in all its branches, Town-planning, etc.),

(सर्वेष्वप्येतेष्वर्थशास्त्रस्यांगेषु विशेषो यत्नः करणीयः);

७ तथा कलाशास्त्रविभागे (ग) कलाशास्त्रविभागे चैते विषया अध्यापनीयाः—

(१) काव्यसाहित्यं (including Poetry, Literature, the Drama, Criticism, Belles-Lettres generally),

(२) गांधर्ववेदः (संगीतशास्त्रम् , including the Science and Art of Music, Acting etc.),

(३) चित्रलेखनशास्त्रम् , (including the Science and Art of drawing, painting, etc.),

(४) रूपकरणशास्त्रम् , (मूर्त्याद्युत्किरणविद्या , including the Science and Art of Sculpture, etc.),

(५) अन्याश्च विविधाः कलाः जीवनपरिष्कारसौंदर्यचारुत्वचातुर्यादिसंपादिकाः, (*i.e.*, other Arts and Sciences tending to refine and beautify life, being further developments, so to say, of what is often taught in schools as Sloyd, Manual Training, Clay-modelling, etc.)

(कलाशास्त्रस्य बहुष्वंगेषु स्त्रीणां विशेषतोऽधिकार इति च मनसि धार्यं; आयत्यां, सति संभवे स्त्रीशिक्षाप्रबंधस्य, एतस्या धारणाया उपयोगो भविष्यति ।)

(६) आंग्लभाषा (विविधभाषाज्ञानमपि चतुःषष्टिकलांतर्गतं प्राचीनप्रथया, इति कृत्वा आंग्लभाषाज्ञानं सामान्यं साधारणग्रंथसमाचारपत्राद्यवलोकनवार्त्तालापादिपर्याप्तं अवश्यमेव सर्वेषामपि छात्राणां संपादनीयं, विनैव च व्याकरणाद्याडम्बरं, यथा मातृभाषाज्ञानं संपाद्यते आवापोद्वापप्रकारैः;

यतः विनांऽग्लभाषाज्ञानमिदानीं ऐहिक-
बुद्धिविकासः लोकसंग्राहकश्चित्तविस्तारः
साधारणवैज्ञानिकसिद्धांतादिज्ञानं चाना-
यासेन न सिध्यति, यैर्विना न देशोन्नतिः);

८ तथा मोक्ष शास्त्रविभागे

(घ) मोक्षशास्त्रविभागे चाध्येयाः विषयाः—

(१) वेदांतः (परा विद्या, ब्रह्मविद्या, अध्यात्मशास्त्रं, including the Science of Being or Reality or Truth, Metaphysics, Philosophy),

अन्यान्युपांगभूतानि दर्शनानि, यथा,

(२) सांख्यम् (including the Principles of World-Evolution and Dissolution and Psychology),

(३) योगः (including Psycho-Physics, Psychical Science, Abnormal Psychology and Applied Psychology),

(४) न्यायः (including the Science of Thinking Logic),

(५) वैशेषिकम् (including the Principles and Ultimate Philosophical Concepts and Laws underlying Physics and Chemistry),

(६) पूर्वमीमांसा (including the Science of Ethics, legal, social, and religio-psychical or superphysical and divine; the Science of the Consequences of Human Action, visible and invisible, physical and psychical, ritualistic and ordinary).

(७) अपराण्यपि दर्शनानि, यथा,

(क) बौद्धदर्शनभेदाः, (ख) जैनदर्शनभेदाः,

(ग) शैवशाक्तपांचरात्रपाणिनीयादिदर्शनानि,

(ख) पाश्चात्यदर्शनानि, इति ।

---

९ विशेषनिर्णयः सामान्येऽङ्गीकृते सभया कार्यः

अयं तु सम्पूर्णविश्वविद्यालयस्य सामान्य आकारः । के पुनरत्र विषयाः सहैव, कैः विद्यार्थिभिः, केषु ग्रंथेषु, कियद्भिर्वर्षैरध्येयाः, काश्च परीक्षाः देयाः, इत्यादि सर्वं विशेषविचाराधीनं; सामान्यस्वरूपेऽङ्गीकृते सति शिष्टसभया विशेषेषु विचारो योक्ष्यते ।

१० विप्रतिपत्तिवारणम्

नत्वत्र विप्रतिपत्तव्यं यत् सर्वाण्यप्येतानि शास्त्राणि सपद्येवाध्यापयितुमारभ्याणि विश्वविद्यालये इति सूच्यते । प्रत्यक्षमेवेदृशस्यारंभस्य सामग्री नास्ति, नाध्यापकाः सर्वेषामेतेषां शास्त्राणां, न चाध्येतारः, न च पर्याप्तानि धनानि विद्यंते यैः समर्थ्येतैतादृश आरंभः; अतो देशे स्वतः प्रवर्त्तमानानां शास्त्राणामध्यापकादिनिर्देशेन साधारणरीत्यैवात्रापि रक्षणं विधाय, प्रलीनानां पुनः संस्कारोद्बोधनाय गवेषकाः वृत्तिधराः यथाशक्यं नियोज्याः, ये प्राचीनांस्तत्तद्विषयकान् ग्रंथानन्विष्युः, नवीनांश्चोपजानीय संकलयेयुः । त एव गवेषकाः पश्चात् परिपक्वज्ञानाः प्रमाणितयोग्यत्वाः संतस्तत्तच्छास्त्राध्यापकत्वे नियोजनीया भविष्यंति । संपत्स्यते सर्वमपीदं, अबहुभिश्च वर्षैः, यदि पुनरुद्युज्यतेऽस्मादेव समयात्, सम्यक् चावधार्य मनसि समग्रमपि लक्ष्यम् ।

११ यथा विद्यायां श्रद्धा प्रथिता तथैव शिल्पादिकर्मणि उचिता, तत्प्रवर्त्तनोपायः

यावच्चैतादृशः कलाशास्त्रार्थशास्त्रोज्जीवनोपयोगी संभारः संभ्रियते तावदंतरालेऽपि यः कश्चन तत्तच्छास्त्रसंबंधी काव्यसाहित्यादन्यः क्रियाभ्यासः हस्तकौशलसंपादनार्थं प्रत्येकेन विद्यार्थिना करणीय एव। एवं सति भवेयुरस्य विश्वविद्यालयस्य छात्राः,

न केवलं पुस्तकिनः न वा केवलशाब्दिकाः।
नोपादातार एवैते किंतु भूतस्य भावकाः॥
प्रायशो दृश्यते लोके सांप्रतं, पुस्तकाश्रिताः।
कृष्यादिव्यवहारस्थान् हस्तपादश्रमान्वितान् ॥
शिल्पोपजीविनश्चापि वाणिज्यव्यवसायिनः।
अन्नस्योत्पादकान् दातॄन् नाद्रियंते यथोचितम् ॥
"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।"
इति कृत्वा च बहव ईदृक्श्रमपराङ्मुखाः।
अर्थशास्त्रेष्वतो जातो ह्रासोऽनर्थकरो महान् ॥

उक्तं च सुश्रुते, "सुबहुश्रुतोऽपि अकृतयोग्यः कर्मस्वयोग्यो भवति, अतोऽधिगतसर्वशास्त्रार्थमपि शिष्यं योग्यां कारयेत्।

एवमादिषु मेधावी योग्यार्हेषु यथाविधि।
द्रव्येषु योग्यां कुर्वाणो न प्रमुह्यति कर्हिचित् ॥"

(सूत्र० अ० ६)

तथा चोक्तं मनुना,

"भूतानां प्राणिनः श्रेष्ठा, प्राणिनां बुद्धिजीविनः।
कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः ॥"

अतः बुद्धिकौशलेन सहैव कर्मकौशलमपि यत् किंचित् सम्पाद्यमेव छात्रैः, एवं सति यथा बुद्धिशक्तिपरिष्कारे आदरो

देशे प्रसृतस्तथैव साक्षादन्नकुप्यादिनवार्थोत्पादकहस्तशक्तिपरिष्कारेऽप्यादरः प्रसरेत्, विविधाश्चाभिमानदुर्बुद्धयो निरस्येरन्; तदैव च सद्योऽर्थकरस्यार्थशास्त्रस्य तदधीनस्य कलाशास्त्रस्य च तत्संबंधिकर्मणां चोत्कर्षणे जनः प्रसज्येतास्मिन्नपि देशे, यथा पाश्चात्येषु प्रसक्तः ।

१३ द्वितीय-विपर्यास-निरासः न च विपर्यस्यं यदुक्तविभागेष्वेकस्मिन् प्रविष्टश्छात्रोऽपरविभागीयशास्त्रेभ्यः परिहापयिष्यते। मैवम् । विभागकरणम् तु केवलं प्रबंधसौकर्यार्थं । यथा सर्वाण्यपि ज्ञानान्येकस्यैव ज्ञानस्यांगानि, यथा सर्वा अपि विद्या एकस्यैव वेदस्योपवेदाः अंगान्युपांगानि वा, एवमेव सर्वेऽप्येते विभागाः परस्परं सम्बद्धाः । उक्तं हि सुश्रुते, (सूत्र० अ० ४)

"एकं शास्त्रमधीयानो न विद्याच्छास्त्रनिश्चयम् ।
तस्माद् बहुश्रुतः शास्त्रं विजानीयात् चिकित्सकः ।।

न चैकस्मिन् शास्त्रे शक्यः सर्वशास्त्राणामवरोधः कर्त्तुं, अतोऽन्यशास्त्रविषयोपपन्नानामर्थानामिहोपनिपतितानामर्थवशात्तेषां तद्विद्येभ्य एव व्याख्यानमनुश्रोतव्यमिति"। तथैकस्मिन्विभाग एकं शास्त्रं मुख्यतयाऽऽधीयानश्छात्रः अन्यान्यपि शास्त्राणि यथोचितमन्येष्वपि विभागेषु श्रोतुं शक्यत्येव ।

—०—

१४ "स्कूल" विभागेऽध्याप्या विषयाः एतावती खलु विश्वविद्यालयस्थ-संस्कृत-विभागप्रबंध-विषया सूचना। प्रसंगतः प्रवेशिकापरीक्षार्थ संस्कृत--"स्कूल" विभागे किं पाठ्यमित्यपि विचार्यमेव। अस्मिन्नपि विचारे स एव चतुःशास्त्रात्मको बीजमंत्रो निर्णायकः । "सर्वेषामपि शास्त्राणां न्यायव्याकरणं मुखं" इत्यपि स्मरणीयम् । मनोराज्ञाऽपि शिरसा धारणीया, सर्वयत्नेन च पालनीया, यथा,

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्यं च संध्योपासनमेव च ॥"

चतुर्ष्वपि शास्त्रेषु प्रवेशनार्थमियं परीक्षा प्रवेशिकेति । अतस्तेषामेव शास्त्राणां साधारणं सरलं पूर्वरूपमारंभकतया छात्रेभ्यो ग्राहयितव्यम्, यथा,

(क) धर्मशास्त्रे—वेदेषु—संध्योपासनविधिः । पुरुषसूक्तम्, अन्याश्च काश्चनोद्धृताः भावोत्कर्षप्रदाः ऋचः, शतपथब्राह्मणोद्धृताः काश्चन कथाश्च, अग्निकार्यं चेति;

वेदांगेषु—व्याकरणम् लघुकौमुदीजन्यज्ञानप्रमितम्, निरुक्तपूर्वरूपभूतोऽमरकोषः, छंदः श्रुतबोधजन्यज्ञानतुल्यं, ज्योतिषेऽङ्कगणितं रेखागणितं च;

स्मृतिषु—मनोरुद्धृताः त्रिशतं श्लोकाः शौचाचारोपदेशकाः, चतुर्वर्गचतुर्वर्णचतुराश्रमस्वरूपनिरूपकाश्च । राजधर्मे हितोपदेशः सम्पूर्णः केवलमश्लीलकथाविरहितः;

न्यायमीमांसयोः—मूलमात्रतर्कसंग्रहजन्यज्ञानतुलितम् ज्ञानम्;

इतिहासपुराणे—मूलरामायणम्,
प्रचलितप्राकृतभाषाबद्धः पुराणेतिहाससंक्षेपः, तथा भारतवर्षस्य चांग्लदेशस्य चार्वाचीनं इतिहासः, भूगोलवर्णनं च;

धनुरुपवेदे—विविधव्यायामकौशलम्;

आयुर्वेदे—दिनरात्रिऋतुचर्या, शौचविधिः, स्वास्थ्यरक्षणप्रकारः, अतिसामान्यव्याधीनां क्षतानां च प्रतीकारोपायः (प्रचलितप्राकृतद्वारा);

(ख) अर्थशास्त्रे—यत्किमपि हस्तकौशलम् साधारणवर्धकिकृषकादिकृत्यात्मकं, यथांऽग्लविभागे (some Manual Training, Sloyd, Cultivation of small plots of Land, etc.) यावद् विशेषः प्रबंधः न संभवति, या काचन सरलवैज्ञानिकप्रक्रिया सयोग्या, तथैव (some easy experiments in science);

(ग) कलाशास्त्रे—काव्यसाहित्यं–सुंदरकांडात् पंचाध्यायाः, यत्किंचित् चित्रलिखनं, रूपकरणं वा (Drawing or Clay-modelling),

ईसप्नीतिकथा—आंग्लभाषायां—(Æsop's Fables in English);

(घ) मोक्षशास्त्रे—पूर्वोक्तं तर्कसंग्रहज्ञानमेवारंभणार्थमलम् ।

यदि सप्तवर्षीयश्छात्रः देवनागराक्षरांकादिज्ञानवान् साधारणपुस्तकवाचनसमर्थः "स्कूल"विभागं प्रविशति चेत्, अष्टभिर्वर्षैः पंचदशवर्षवयस्कः सन् एतावज्ज्ञानं संगृह्य प्रवेशिकां परीक्षामुत्तरीतुं पारयिष्यति, सुतरां चैवं यदि संस्कृतभाषाज्ञानं अध्यापकैश्छात्रबुद्धिषु तैरेव नैसर्गिकैः प्रकारैस्संक्राम्यते यैरावापोद्वापरूपैः मातृभाषाज्ञानमुत्तममध्यमवृद्धैर् बालानां हृदयेषूद्भाव्यते, यदि च प्रचलितदेशभाषया चाधिकतरं शिक्षणं क्रियते। पूर्वोक्तसर्वशास्त्रमुखेन चतुर्ष्वपि शास्त्रेष्वेवं प्रवेशश्छात्राणां, मनोरादेशस्य च पालनपि भविष्यतीत्यलम्।

(३) उपसंहारः

१ देशयोगक्षेमरूपलक्ष्ये संयम्य चतुःशास्त्रसंपूरणाय नवगवेषणमवश्यं कार्यं, तस्मादेवास्मद् देशोन्नतिः यथा पाश्चात्यानां

यद्येवं मनसाऽऽपूर्य खंडितं ज्ञानमण्डलम् ।
कायव्यूहं कल्पयित्वा शास्त्राणां चतुरंगिणम् ॥
छिन्नांगोपांगसंपत्त्यै यत्नश्चेत् क्रियते जनैः ।
मंत्रमूर्त्तिमयो देवः साक्षान्मूर्त्तिर्भविष्यति ॥
यच्छिष्टं तस्य रक्षायै लुप्तस्योज्जीवनाय च ।
यतामहे यदि वयं योगक्षेमं भवेत्तदा ॥
अर्थशास्त्रे महान् यत्नः कार्योऽनर्थोऽन्यथा भवेत् ।
लुप्तप्रायं हि तच्छास्त्रं शक्तिह्रासादुपेक्षया ॥
तदुद्धाराय यत्नेन गुप्तग्रंथगवेषणे ।
नियोज्या वै वृत्तिधरास्तथोपज्ञानसंग्रहे ।
संस्कृतप्राकृतैश्चापि नवग्रंथनिबंधनैः ।
रिक्तोऽधुना गिराकोशश्चाप्येवं पूरयिष्यते ॥
वैद्यके, ज्योतिषे, शिल्पे, यंत्रतंत्रादिकर्मणि ।
तदुपांगेषु शास्त्रेषु, विद्यासु सकलासु च ।
पाश्चात्यैर्भृशमुत्कर्षो बलात्कृष्टो गवेषणात् ॥
उपसर्गास्तु शास्त्रेषु तत्तद्विषयसंयमे ॥
तेषां ते नितरां जाता व्यवहारेषु सिद्धयः ॥
कुत्रचित्कर्हिचिद्वापि सिद्धिर्नास्ति ऋते तपः ।
ऋते लक्ष्येऽपि निर्णीत एकाग्रध्यानधारणम् ॥

२ लीनानां शास्त्राणां व्युत्थापनाय विशेषतो यतितव्यं

सम्यङ् निरूप्य मनसि कृत्यस्यांगान्यशेषतः ।
आरभ्यते ततः कार्यं तदा सिद्धिर्भवेद्ध्रुवा ॥
सर्वेषामपि चांगानामिदानीमपि संति हि ।
विद्यालये वै बीजानि, विकासीनि तु कानिचित् ।
मुकुलान्यपि चान्यानि, प्रलीनान्यपराणि तु ॥
उद्बोधनाय लीनानामादौ यत्नो विधीयताम् ॥
तत्पश्चादनुसंधेयं मुकुलानां विकासनम् ।
जाग्रतां पुनरन्येषां रक्षणं केवलं ह्यलम् ॥

३ पौरस्त्यपाश्चात्योभयशास्त्रादरावश्यकता

न वाच्यम् ,आंग्लभागे यद्देतत्सर्वं भविष्यति ।
यंत्रतंत्रादिशिल्पादिवार्त्ताविद्याप्रसादनम् ॥
तत्रापि यत्नः कार्यः स्यान्नूनमत्रापि वै तथा ॥
स्वकीयदंतजिह्वादिव्यापारेण विना यथा ।
ऋते च स्वांगसंजातरसपित्तादिमेलनम् ।
यथा न संभवेन्नोरुक् कदाप्याहारजारणम् ॥
शास्त्रग्रामो विदेशीय आत्मसान्न भवेत्तथा ।
तत्संबंधिस्वकीयस्य शास्त्रस्यापि बलं विना ॥
अन्यथा चेद्विमर्दः स्याद्विसंवादश्च सर्वथा ।
परस्परम् ,असंबोधाद्, यथा वै भिन्नभाषिणोः ॥
येषां केवलमांग्लीया, येषां केवलसंस्कृता ।
शिक्षा, मिथोऽपि विद्वांसः सौमनस्यं भजंति नो ॥
सं सुखेन न गच्छंति, सं वदंति च नो सुखम् ।
सं मनांसि न तेषां च जानते, ऽबोधनान्मिथः ॥
परस्परं नाद्रियंते, प्रत्यक्षं खेददं त्विदम् ।
येषां तूभयविज्ञानं ते द्वयोरपि सादराः ॥

प्रतिशास्त्रमतः साध्यः संबंध उभयोरपि ।
प्राचीनस्य नवीनस्य; न देशोन्नतिरन्यथा ॥

४ प्राचीनस्य पुनर्नवीकरणं

प्राचीनो बीजमंत्रः स्यान्नित्यं रक्ष्यः प्रयत्नतः ।
शाखापल्लवसंतानं काले काले नवं नवम् ॥
शाश्वतं मूलसूत्रं स्यान्न विवर्त्त्यं कदापि तद् ।
भाष्यं तु जीर्णमुद्धार्य नवज्ञानैः पुनः पुनः ॥
नित्यानामार्षवाक्यानामपि सर्वज्ञबीजिनाम् ।
अवस्थाभेदतो व्याख्या कर्त्तव्यैव नवा नवा ॥
जीमूतो दायधर्म हि टीकया पर्यवर्त्तयत् ।
"युक्तियुक्तमुपादेयं वचनं बालकादपि ।
अन्यत्तृणमिव त्याज्यमप्युक्तं पद्मजन्मना ॥"

५ एवं पुनर्बलवद्विद्याविकासः

"पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजंते मूढः परप्रत्ययनेयबुद्धिः ॥"
इति वासिष्ठवाक्यं चाप्यर्वाचीनकवेरपि ।
सम्यङ् निधाय मनसि सर्वपक्षान् विविच्य च ॥
प्राचीनं मौलिना धृत्वा यदुक्तममकृत्रिमम् ।
तथोपकारकं सर्वं नवं चादाय सादरम् ॥
गंगाया यमुनायाश्च संगमस्य ह्यनंतरम् ।
न तु तत्पूर्वमेव, एषा स्रोतः पीत्वा महत्तरम् ।
पुनर्बलिष्ठा वै विद्याः काशी संकाशयिष्यते ॥

॥ इति ॥ ॐ ॥

भगवान्दासः

(काशीविश्वविद्यालय-प्राच्यविद्याविभाग-

"Seváshrama," धर्मविज्ञानविभाग-शास्त्रमंडलसभ्यः)

Sigra, Benares (Cantt.)
Dated 25th November, 1917.

BHAGAVAN DAS,
(*Member of the Faculties of Oriental Learning and Theology, B. H. U.*)

Printed by Apurva Krishna Bose, at the Indian Press, Allahabad.

काशीविश्वविद्यालयसंस्कृतविभाग-प्रबंधसंस्करणोपन्यासस्य

(४) परिशिष्टम् ।

वर्णाश्रमाणां व्याख्यानं शिक्षाविधिविचारणे ।
एतावद्विस्तरात्कस्माद्, इति शंका निवार्यते ॥
इष्टे प्रवृत्तिर्नान्यत्र, तच्चाभ्युदयमोक्षणे, ।
तत्सिद्धिर्न ऋते धर्मं, स च वर्णाश्रमात्मकः, ॥
न तस्याचरणं शक्यं विना ज्ञानं, न तद्भवेत् ।
शिक्षणेन विना, ऽतो हि शिक्षाविधिविवेचने ।
वर्णाश्रमाणां तत्त्वस्य न्यायप्राप्तो विनिर्णयः ॥
शिक्षा साधनभूता हि, न स्वयं साध्यमेव सा, ।
साध्यते च तया स्वस्वोचितधर्मस्य योग्यता ॥
शिष्याणां ; उचितः कस्य वृत्तिधर्मस्तु कः पुनः, ।
अध्यात्मशास्त्रमत्र स्यात् प्रमाणं, नापरं खलु ॥
यतः सनातनो धर्मो ब्रह्मविद्याप्रतिष्ठितः ।
वर्णाश्रमाचारसारोऽध्यात्ममर्मा हि वैदिकः ।
अतः प्रसक्ता तच्छास्त्रदृष्ट्यैतादृग्विवेचना ॥
संसारयति संसारं शक्तित्रितयमात्मनः ।
ऐं-ह्रीं-क्लीमिति संज्ञाभिर्मंत्रतंत्रेषु यत्स्मृतम् ॥
प्रकृत्या ज्ञानशक्तेस्तु योऽधिको ब्राह्मणस्तु सः ।
क्रियायां च रुचिर्यस्य क्षत्रियस्स स्वभावतः ।
इच्छाशक्तिप्रधानो यो वैश्यधर्मा हि स स्मृतः ॥
" विवाहे भोजने चास्तु कुलजातिविवेचनम् " ।
इत्याह शुक्रो यत्तत्तु लोकच्छंदानुरोधतः ॥
नूनमुद्वाह्यभोज्येषु परीक्षणमपेक्ष्यते ।
कर्मशीलगुणानां वै अधिकं ह्यन्यकार्यतः ॥
शीलव्यसनसाम्ये हि यतः सख्यं, न चान्यथा ।
मित्रभावो रतिप्रीती सहासनसहाशने ॥
न पुनर्जातिनाम्ना वा केवलं कुलनामतः ।

भोजने वा भवेच्छुद्धिरुत्कर्षो वापि संततौ ॥
ऊर्जप्रदं सुभोज्यं स्यात् स्वास्थ्यारोग्यकरं च तत् ।
पाचितं शुचिहस्ताभ्यां प्रीत्या च परिवेषितम् ॥
" विशिष्टेन विशिष्टायाः संगमो गुणवांस्तथा "। (नवो॰)
रतिदः प्रीतिदश्चापि तथोत्कृष्टप्रजाप्रदः।
अतो भोज्ये विवाहे चादिष्टं बहुविवेचनम् ॥
किंत्वादेशस्य बोधेऽत्र यथाऽन्येषु बहुष्वपि ।
स्थलेषु विपरीतत्वं जातं मीमांसनं विना ॥
" यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः "। (मनुः)
" अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता ।
सर्वार्थान्विपरीतांश्च बुद्धिस्सा पार्थ तामसी" ॥ (गीता)
गौणं तु मन्यते मुख्यं मुख्यं गौणं तथैव च ।
साधकानामन्यतमं समाश्लिष्यति भूरिशः ।
साध्यं चाप्यन्यथासिद्धं छन्नदृष्टिर्व्यपोहति ॥
इत्येवं जातिनामैवाशनोद्वाहेषु चिन्त्यते ।
त्यज्यते यदुपादेयं, यद्वर्ज्यं गृह्यते तु तत् ।
स्पृश्यते यच्च न स्पृश्यं, स्पृश्यं न स्पृश्यते पुनः ॥
विवाह्यं वर्ज्यते दूराद्, अविवाह्यमुदुह्यते ।
भक्ष्यते यच्च न प्राश्यमाहार्यं च न भुज्यते ॥
भारते यत्र चाभेदबुद्धिः सिद्धांतिता बुधैः ।
परस्परद्रोहकरी भेदबुद्धिर्विवर्धते ॥
सर्वेषु व्यवहारेषु क्लेशः सर्वैश्च लभ्यते ।
धर्मशास्त्रामृतं बुद्धौ ज्वरितायां विषायते ॥
व्यवहारसहायार्थं समाम्नातं हि यत्पुरा ।
दुष्प्रयोगात्तदेवाद्य विघ्नीभवति सर्वतः ।
हिंदुसंख्यासंघबले क्षीयेते चोत्तरोत्तरम् ॥

देशकालनिमित्तानां दुष्प्रयोगोऽवहेलनात् ।
तेषां तु सुविवेकेन सुप्रयोगो भवेद् दृढः ॥
"यस्मिन् देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तांतरेष्वधर्मो भवति "। (शारीरकभाष्यं, ३-१-२५)
शंकरः स्वीकरोत्येवं पूर्वं यन्मनुरादिशत् ।

"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेषु मीमांस्ये ताभ्यां धर्मो हि निर्बभौ"। (मनुः)
देशकालनिमित्तानां मीमांसा स्याद्विवेचनम् ॥
"अमीमांस्ये" पठंत्यत्र केचित्प्रश्नासहिष्णवः ।
"जिज्ञासा नास्ति नास्तिक्यं" इति मात्स्योक्तिभर्त्सकाः ॥
विस्मरंतश्च यच्छास्त्रं मीमांसानामकं बृहत् ।
तयोर्मीमांसनार्थं, नामीमांसायै, विनिर्मितम् ॥

सात्त्विकी चेत्पुनर्बुद्धिरत्र तथ्यार्थदर्शिनी ।
आध्यात्मिकी हेतुगर्भा तर्कपुष्टावलंब्यते ।
शीघ्रमेवापनीयेत सर्वाऽऽनर्थपरंपरा ॥
"उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।" (गीता)
पौराणिकी प्रथा चेयं "संघे शक्तिः कलौ युगे" ॥
बृंहणीयोऽत आत्मीयः पक्षः संघश्च धीमता ।
एतच्च सुकरं तेषां यैरध्यात्ममुपास्यते ॥
स्वभावाद् गुणवैषम्यं, विभागः कर्मणस्ततः ।
चातुर्वर्ण्यं ह्यनायासमतः सर्वे नराः स्थिताः ।
वर्णसंघः स्वयं चातः सर्वमानवगूहकः ॥

ब्राह्मणाः शतधा संति गौड़ा वांगाश्च गौर्जराः ।
काश्मीरका नामबूद्राः कौंकणा मालवास्तथा ॥
तैलुगूत्कलकालिंगाः औदीच्या मैथिला अपि ।
महाराष्ट्राः कान्यकुब्जा शरयूपारकास्तथा ।
सारस्वता द्राविड़ाश्च शाकद्वीपोद्भवादयः ॥
प्रायशो देशभेदेन जातास्ते भिन्नसंज्ञकाः ।
तथा श्रद्धाविशेषेण शैवाः शाक्ताश्च वैष्णवाः ॥
सौराश्च गाणपत्याश्च नृसिंहादीष्टपूजकाः ॥
निरामिषभुजः केचित् केचिदामिषभोजिनः ।
बहवः परिहर्त्तारः केचित्पूजासुराग्रहाः ॥
देशवेशोक्तिभिर्भिन्ना अत्यंतांतररीतयः ।
विवहंति न चान्योन्यं न स्पृशंति परस्परम् ॥
स्वं स्वं श्रेष्ठतमं चापि प्रत्येकं खलु मन्वते ।
भेदानंत्येऽपि किंत्वेते सर्वे ब्राह्मणसंज्ञकाः ॥

वसोः पवित्रे सत्येवं शतधारे, कथं नहि ।
चतुःपंचोत्तरा सा स्यात् शतसंख्या हिताय नः ॥
खीस्तीया ब्राह्मणाः संतु मुस्लिमा ब्राह्मणास्तथा ।
ज़र्दुश्तीया तथा विप्रा विप्रा बौद्धा जिनास्तथा ॥
यथा स्मार्त्ता यथा शाक्ता वैष्णवा ब्राह्मणा यथा ।
ये ज्ञानवृद्धा एतेषु भवेयुर्धर्मचिंतकाः ।
तपःसत्यदयायुक्ता ब्राह्मणोचितवृत्तयः ॥
मा स्प्राक्षुर्मा विवाक्षुर्वाऽप्येते ननु परस्परम् ।
वृत्तिर्ब्राह्मणरूपा चेत् संज्ञा कस्मान्निवार्यते ॥
क्षत्रियाश्चापि शतधा संत्येवं भारते स्थले ।
सूर्यवंशिन एवैके ह्यपरे सोमवंशिनः ॥
रघुवंशभवाश्चान्ये यदुवंशभवाः परे ।
सोलंकिनः प्रमाराश्च चोहाना बैसवारकाः ॥
शीशोदियाख्याश्चैवान्ये राठोराख्यास्तथाऽपरे ।
विसेना डोगरा थापागुरुङ्इत्यादिनामकाः ॥
प्रायशश्चामिषभुजः केचिच्चापि सुराग्रहाः ।
केचिच्चोपासते विष्णुं केचिच्छिवमुपासते ॥
देवीभक्तास्तथा केचित् केचिच्चान्येष्टदेवताः ।
उपवीतं धारयंति केचित, नैव तथाऽपरे ॥
देशवेशोक्तिभिर्भिन्ना आचारैस्सुविलक्षणाः ।
विवहंति न चान्योन्यं न स्पृशंति परस्परम् ।
तथापि क्षत्रियत्वेनान्योन्यं स्वीकुर्वतेऽञ्जसा ॥
सत्येवं न पुनः कस्मादन्येऽपि बहवो जनाः ।
शूरा वीरा बलोद्रिक्ताः कर्ममार्गे धुरंधराः ॥
समशीलव्यसनिनस्तद्वद्भोजनपानिनः ।
खीस्तस्योपासका वा स्युर्मुहम्मदनुवर्त्तिनः ॥
ज़र्दुश्तबद्धश्रद्धा वा बुद्धदेवमते स्थिताः ।
क्षत्रियोचितरूपाः स्युरपि क्षत्रियसंज्ञकाः ॥
वैश्याश्च शतधा ह्येवं भारते सांप्रतं स्थिताः ।
अग्रवालास्तथोस्वालादच्चूरुवालास्तथाऽपरे ॥
खंडेलवालाः श्रीमालास्तथा माहेश्वरा अपि ।
श्रेष्ठी चेटी तथा श्रेष्ठ सेठ इत्यादिनामकाः ॥

रीतिभिर्भाषणैर्देशैर्वेषैरिष्टैश्च भेदिताः ।
केचिद्रामं शिवं केचित् कृष्णं केचिज् जिनं परे ॥
गणेशमपरे सूर्यं हनूमंतमनुव्रताः ।
प्रायशः सर्व एवैते मद्यमांसविवर्जकाः ।
विवहंति न चान्योऽन्यं न स्पृशंति परस्परम् ॥

सत्येवं किन्तु जापानचीनयूरपदेशजाः ।
मुहम्मदूखीस्तज़र्दुश्तजिनबुद्धानुयायिनः ।
वार्त्तया वर्त्तिनो न स्युर्वैश्यवर्णत्वसंयुताः ॥

तथैव शतधा शूद्रा व्याप्ता भारतभूमिषु ।
मालाकाराः कुंभकारा गोपाला अविपालकाः ॥
लौहकाराश्च कर्म्मारा रजका धावकास्तथा ।
आभीरा नापिताः कोरीकुन्बीगडुरनामकाः ।
तैलिका नायराः सेना प्रभूकायस्थजाटकाः ॥
एतेषु केचिदात्मानं स्वस्ववृत्त्यनुरूपतः ।
वैश्यान्वा क्षत्रियान्वापि ब्राह्मणान्वा तथा पुनः ।
देशकालानुसारेण मन्वते हि यथोचितम् ॥
विवादोऽपि महांस्तत्र प्रांते प्रांते विजृम्भते ।
ब्राह्मणेतरवर्णानां ब्राह्मणानां तथांतरे ॥
ब्राह्मणा वयमेवात्र सर्वेऽन्ये शूद्रजातयः ।
आगृह्णंत्येवमेके तु, तत्रान्ये च विरुंधते ॥
विवहंति च नान्योन्यं न स्पृशंति परस्परम् ।
देवोपदेवभूतादीन् पशुपक्षिसरीसृपान् ॥
वृक्षान् प्रेतान् गंडशैलान् अश्मखंडकसंचयान् ।
अन्यांश्च विविधानिष्टान् श्रद्धया संभजंति ते ॥
विश्लिष्टा भाषणैर्देशवेशैस्संस्काररीतिभिः ॥

सत्येवं ये विदेशेषु वर्त्तंते समवर्त्तनैः ।
मतांतरान्धारयंतः किन्न स्युस्तुल्यवर्णिनः ॥
मा स्प्राक्षुर्मा विवाक्षुर्वा यद्यप्येते परस्परम् ।
स्वंस्वं श्रेष्ठतमं चापि मन्येयुर्वा यथेप्सितम् ।
प्रबोधचंद्रोदये यद्वन् नाटके वर्णितं मुदा ॥
" सदनमुपगतोऽहं पूर्वमम्भोजयोनेः

सपदि मुनिभिरुच्चैरासनेपूज्झितेषु ।
सशपथमनुनीय ब्रह्मणा गोमयाम्भः-
परिमृजितनिजोराावाशु संवेशितोऽस्मि ॥"
संत्येव वर्णाः सर्वेऽपीदानीं भूमंडलेऽखिले, ।
सूचितं हि यथा पूर्वं, किं तूक्ता भिन्ननामभिः, ।
यथा प्राचीनवर्षेष्वार्वाचीनेष्वपि वै तथा ॥
पश्चिमेष्वांग्लभाषायां तेषां संज्ञाः प्रकीर्त्तिताः ।
प्रीस्ट्-सोल्जर-मर्चेंट-लेबरर्-चेतिनामभिः ॥
पार्समिस्रार्वदेशेषु मुहम्मदनुयायिषु ।
आलिम्-आमिल्-तथा ताजिर्-मज़्दूर् इति च शब्दिताः॥
पारसीकेषु ज़र्तुश्तमुनिधर्मावलंबिषु ।
अथर्वन्-अरथस्तार-वस्त्र्य-हुविश्-इतीरिताः ॥
जापाने "निपुण"-द्वीपे शिंत्वादिमतधारिषु ।
शोगुन्-समूरा-हैमिन्-श्रापि-एता-इत्यादि च वर्णिताः ॥
चातुर्वर्ण्यस्य संघस्य विस्ताराय च पुष्टये ।
स्वीकारोऽपेक्षितो ह्येषां संस्कृतैर्नामभिः कुषत् ॥
तर्केण मानवो धर्म एवं संधीयते यदि ।
सर्वेऽपि मनुजा नूनं मनुधर्मावलंबिनः ।
निसर्गेणैव सिध्येयुर्वैदिकास्ते स्वभावतः ॥
" यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्त्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥
अस्मिन् धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणां ।
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ॥
देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान् ।
पाषंडगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः ॥" (मनुः)
ब्रह्मचर्याश्रमस्यातः शिक्षाविधिविवेचनं ।
नितांतमंगभूतं हि वर्णतत्त्वं विचारितम् ॥
प्रकृतिः पुरुषस्येह माया या ब्रह्मणः स्मृता ।
प्रधानं वा परेशस्य स्वभावः परमात्मनः ।
आविर्भावतिरोभावगुणास्तस्य त्रयो गुणाः ॥
तमो रजश्च सत्त्वं चेच्छाक्रियाज्ञानरूपिणः ।
द्रव्यकर्मगुणा वापि-आनन्दसच्चिद्विवर्त्तिनः ॥

स्वभावप्रभवाणां हि गुणानामनुसारतः ।
कर्माणि प्रविभक्तानि जनानामंतरात्मना ॥
ज्ञानप्रधानो विप्रः स्यात् क्षत्रिये तु क्रियाधिका ।
इच्छाविशेषवान् वैश्यो गुणमौग्ध्यात् तु शूद्रता ॥
उत्तमं जन्मकर्मभ्यां कर्मणैव तु मध्यमम् ।
अधमं केवलं जात्या वर्णवत्त्वं विधीयते ॥
सर्वं द्वंद्वमयं लोके न किंचित्स्येकनिर्मितम् ।
पक्षेण प्रतिपक्षेणाप्यखिलो विषयो युतः ॥
अंशौ गृहीत्वोभयतो मध्यस्था वृत्तिरिष्यते ।
"आश्रयेन्मध्यमां वृत्तिमति सर्वत्र वर्जयेत् ॥"
प्रभुर्न केवलं बीजं, नाप्येकं हि तपःश्रुतम् ।
न केवलं तु जन्मैव, न वा कर्मैव केवलम् ॥
एकांततः प्रमाणं स्यात् समाजस्य व्यवस्थितौ ।
" यस्माद् बीजप्रभावेण तिर्यग्जा ऋषयोऽभवन् ।
पूजिताश्च प्रशस्ताश्च तस्माद् (१) बीजं प्रशस्यते ॥"
" यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् ।
सर्वं तत्तपसा साध्यं (२) तपो हि दुरतिक्रमम् ॥"
" (१) तपो (२) बीजप्रभावैस्तु ते गच्छंति युगे युगे ।
उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ॥ " (मनुः)
एवं ह्युभयमाहात्म्यमवोचद् भगवान्मनुः ।
"(१) तपःश्रुतं च (२) योनिश्च द्विजत्वे कारणं स्मृतम्॥"
(वनपर्व)
इत्येवं पात्रमुखतः व्यासोऽनूवाच तं ऋधक् ॥
" स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।" (गीता)
इत्येतद्भगवद्वाक्ये स्वधर्मस्तु स एव यः ।
स्वभावजगुणैरेव व्यक्तेर्व्यक्तं प्रसूचितः ॥
स्वभावोऽतो विचार्यः स्यात् शिष्यशिक्षाविशेषणे ।
न च तच्छक्यते कर्तुं विनाऽध्यात्मविचारणम् ॥
"शास्त्रमेव प्रमाणं स्यात्कार्याकार्यव्यवस्थितौ" । (गीता)
सर्वशास्त्रप्रतिष्ठानमत्राध्यात्मं प्रमातमम् ॥
इहस्यामुष्य चैवापि सम्यग्ज्ञानं विनोभयोः ।
नाध्यात्मशास्त्रस्य ज्ञानं बंधमोक्षात्मकं भवेत् ॥

वर्त्तमानपराधीनावस्थायां भारतस्य च ।
पाश्चात्यविज्ञानमृते जगद्वृत्तं न बुध्यते ।
विहाय संस्कृतं वापि धर्ममर्म न विद्यते ॥
ऋते चोभयसंबोधं नैवैकमपि सिध्यति ।
नेदं न वाप्यदो, नापि मोक्षो नाऽभ्युदयोऽथवा ॥
सुशिक्षणायापत्यानां सर्वार्थोत्कृष्टयेऽप्यतः ॥
सनातनार्यधर्मेण सर्वकार्यसमृद्धये ।
मोक्षणाय च बंधेभ्यो देशस्याभ्युदयाय च ॥
चतुश्शास्त्रक्रमेणैव पौर्वपाश्चात्यमिश्रिता ।
संतान्या ह्यार्यसंताने संततं ज्ञानसंततिः ॥
प्रकृत्यैव च यो यस्यास्त्यधिकारी विशेषतः ।
शास्त्रमध्यापनीयं स्यात्तत्तदस्मै प्रयत्नतः ॥

एवमेव कृते विद्यापीठस्य कृतकृत्यता ।
पाल्यते पोष्यते नित्यं येन देशेन चाप्यसौ ॥
अस्खलच्छात्रसंतत्या प्रत्यब्दं वर्धमानया ।
सर्वज्ञानकलादाद्यभृतया ह्यग्भूतया ॥
सम्पदां तस्य देशस्य कलानां च विवर्धनैः ।
धार्मिकैर्ज्ञानसम्पन्नैर्बंधेभ्यश्चापि मोक्षणैः ॥
भवेत्प्रत्युपकारेण प्रतिपन्ना कृतज्ञता ।
मातापित्रोस्तु वार्धक्ये सत्पुत्रस्येव सेवया ॥

म्लानं मुखं भरतदेशवासिनाम्
भूयो भवेत् सुरभि सुप्रभायुतम् ।
भर्गो वरेण्यमुत्तेजयेत्तथा
सवितुस्सदाऽऽखिलजनस्य शेमुषीम् ॥

॥ ॐ ॥

भगवानदास ।

(काशीविश्वविद्यालय-"प्राच्यविद्याविभाग"-"धर्मज्ञानविभाग"-शास्त्रिमंडलसभ्यः)

"Sevashrama," Sigra, Benares (Cantt.) *Dated 10th March 1918.*

BHAGAVAN DAS, (Member of the Faculties of Oriental Learning and Theology, B. H. U.)

Printed by Rameshwar Pathak at the Tara Printing Works, Benares.